तत्र नक्षत्रादीनां लिङ्गभेदा यथा "हस्ता स्वाती श्रवणा अक्लीवे मृगशिरो नपुंसि स्यात्। पुंसि पुनर्वसुपुष्यौ मूलं त्वस्तो स्त्रियः शेषाः" अधिकमृक्षशब्दे १४००पृ० दृश्यम्। "काली तारा महाविद्या षोड़शी भुवनेश्वरी" इत्यादि तन्त्रसा० "तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी। उग्रापत्तारिणी यस्मादुग्रतारा ततः स्मृता" तन्त्रसा० तन्नामनिरुक्तिः। ३बुद्धदेवताभेदे ४वृहस्पतिभार्य्यायाम् मेदि०। ५सुषेणवानरकन्यायां वालिभार्य्यायाञ्च ६चिड़ानामगन्धद्रव्ये ७मुक्तायाञ्च राजनि०। "वृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीम्। जहार तरसा सर्वानवमत्याङ्गिरःसुताम्। स (चन्द्रः) याच्यमानो देवैश्च तथा देवर्षिभिः सह। नैव व्यसर्जयत् तारां तस्मायाङ्गिरसे तदा" "ददावङ्गिरसे तारां स्वयमेव पितामहः। तामन्तःप्रसवां दृष्ट्वा तारां प्राह वृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। अयोनावुत्सृजत्तं वै कुमारं दस्युहन्तमम्। ईषीकास्तम्बमासाद्य ज्वलन्तमिव पावकम्। जातमात्रः स भगवान् देवानामक्षिपद्वपुः। ततः संशयमापन्नास्तारामुचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ वृहस्पतेः। पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा। तदा तां शप्तुमारब्धः कुमारो दस्युहन्तमः। तं निवार्य ततो ब्रह्मा तारां पप्रच्छ संशयम्। यदत्र तथ्यं तद् ब्रूहि तारे! कस्य सुतो ह्ययम्। सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं शनैः। सोमस्येति महात्मानं कुमारं दस्युहन्तमम्" हरिवं० २५ अ०। "सुषेणदुहिता चेयमर्थसूक्ष्मविनिश्चये। औत्पातिके च विविधे सर्वतः परिनिष्ठिता। यदेषा साध्विति ब्रूयात् कार्य्यं तन्मुक्तसंशयम्। न हि तारा मतं किञ्चिदन्यथा परिवर्त्तते" रामा० कि० २२ अ०। सा च पश्चात् वालिनो मरणानन्तरं सुग्रीवभार्य्या "तारया सहितः कामी सक्तः कपिवृषस्तदा" ३१अ० "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" तत्र मुक्तायां "तारावलीविकरणैर्व्यरुचन् निवासाः" माघः। कनीनिकायां "लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बाः" माघः।

ताराश्च अश्विन्यादयः। ज्यो० त० ताः तद्विशेषादिकञ्चोक्तं यथा

"अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षं तथा चार्द्रा पुनर्वसुकपुष्यकौ। अश्लेषा च मघा पूर्वफल्गुन्युत्तरफल्गुनी। हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका। ज्येष्ठा मूलं तथाषाढ़े पूर्वोत्तरपदादिके। श्रवणा च धनिष्ठा च शतभिषाद्यभाद्रिका। उत्तरादिभाद्रपदा रेवती भानि च क्रमात्"। "अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः। योन्यर्य्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राः। शक्रो निरृतिस्तोयं विश्वविरिञ्चौ हरिर्वसुर्वरुणः। अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" विशाखायाः शक्राग्न्योर्मिलितदैवतत्वम् अभिजितोभिन्नत्वेन अष्टाविंशतिरिति तच्च वक्ष्यते इति नक्षत्राधिपाः "उग्रः पूर्वमघान्तका ध्रुवगणस्त्वौग्युत्तराणि स्वभूर्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः। चित्रा मित्रमृगान्त्यभं मृदुगणस्तीक्ष्णोऽहिरुद्रेन्द्रयुक्। मिश्रोऽग्निः सविशाखभः शुभकराः इत्थं स्वकृत्ये गणाः।" "शशाङ्कतारयोः शुद्धिर्विचार्य्या सर्वकर्मसु। ग्रहाणामपि सर्वेषां तच्छुद्धौ फलदातृता"। श्रीपतिसमुच्चये "ताराचन्द्रबले प्राप्ते दोषास्त्वन्ये भवन्ति ये। ते सर्वे विलयं यान्ति सिंहं दृष्ट्वा गजा इव। जन्मसम्पत् विपत्क्षेमं प्रत्यरिः साधकोवधः। मित्रं परममित्रञ्च जन्मभाच्च पुनःपुनः। सर्वमङ्गलकार्य्याणि त्रिषु जन्मसु कारयेत्। विवादश्राद्धभैषज्ययात्राक्षौरादि वर्जयेत्। यात्रायां पथि बन्धनं कृषिविधौ सर्वस्य नाशोभवेत्। भैषज्ये मरणं तथा सुनियतं दाहोऽगृहारम्भणे। चौरे रोगसमागमोबहुविधः श्राद्धेऽर्थनाशस्तथा वादे बुद्धिविनाशनं युधि भयं प्राप्नोत्ययं जन्मभे। पापाख्या तु त्रिविधा पञ्चचतुर्दशविंशतिस्त्रियुता। सिद्धिफला वृद्धिकरी विनाशसंज्ञा क्रमात् कथिता"। "जन्माद्यं कर्म्म ततोपि दशमं सांघातिकं षोड़शकम्। समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम्। आद्यात्तु पञ्चविंशम् मानसमेवं नरः षड्भः स्यात्। नवनक्षत्रोऽन्यपतिः स्वजातिदेशाभिषेकर्क्षैः"। जात्यर्क्षन्तु। "पूर्वात्रयं सानलमग्रजानां राज्ञान्तु पौष्णेन सहोत्तराणि। सपौष्णमित्रं पितृदैवतञ्च प्रजापतेर्भञ्च कृषीवलानाम्। आदित्यहस्ताभिजिदश्विभानि तान्यन्त्यजातेः प्रभविष्णुतायाम्"। (देशभं देशनामर्क्षम्)। नाड़ीनक्षत्राणि। "देहादेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते। कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे। मूर्च्छिद्रविषबन्धूनां हानिः सांघातिके तथा। संतप्ते सामुदयिके